तिरुमलतिरुपतिदेवस्थानानि

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

March 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 12
March 2026, Price Rs.20/-
No. of pages-24

ओण्टिमिट्टश्रीकोदण्डरामस्वामिनां कल्याणोत्सवः

31.03.2026

ओण्टिमिट्टु
श्रीकोदण्डरामस्वामिनः ब्रह्मोत्सवः
25.03.2026 तः 03.04.2026 पर्यन्तम्

दिनाङ्क	वासरः	प्रातः उत्सवः	रात्रौ उत्सवः
25-03-2026	सौम्यवासरः	न्यासाभिषेकः	अङ्कुरार्पणम्
26-03-2026	बृहस्पतिवासरः	ध्वजारोहणम्	शेषवाहनम्
27-03-2026	भृगुवासरः	वेणुगोपालालङ्कारः	हंसवाहनम्
28-03-2026	मन्दवासरः	वटपत्रशायिनः अलङ्कारः	सिंहवानहम्
29-03-2026	भानुवासरः	नवनीतकृष्णस्य अलङ्कारः	हनुमत्सेवा
30-03-2026	इन्दुवासरः	मोहिनी सेवा	गरुडसेवा
31-03-2026	भौम्यवासरः	शिवधनुर्बाणालङ्कारः	अभ्यागमनम्, कल्याणोत्सवः, गजवाहनम्
01-04-2026	सौम्यवासरः	रथोत्सवः	---
02-04-2026	बृहस्पतिवासरः	कालियमर्दनालङ्कारः	अश्ववाहनम्
03-04-2026	भृगुवासरः	चक्रस्नानम्	ध्वजावरोहणम्

गीतामृतम्

श्रीभगवानुवाच -

एषा ब्रह्मी स्थितिः पार्थनैनां प्राप्य विमुह्यति।
स्थित्वाऽस्यामन्तकाले ब्रह्मनिर्वाणमृच्छति।।

(भगवद्गीता २.७२)

७२. भावः - अर्जुन! एतावत्पर्यन्तमुक्ता ब्राह्मीस्थितिः। अर्थात् ब्रह्मसम्बन्धपदप्रप्तेः साधननिष्टा। इमां निष्ठां प्राप्तः न मोहं प्राप्नोति। मरणकालेऽपि अस्यामेव निष्ठायां विद्यमानः ब्रह्मनिर्वाणं ब्रह्मैक्यं ब्रह्मणि, लीनं मोक्षं प्राप्नोति।

बहुकालपर्यन्तं अन्धकारावृतगुहायां दीपे ज्वलिते यथा अन्धकरविनाशात् गुहा प्रकाशवती स्यात् तद्वत् हृदयगुहायां चिरकालाज्ञानतमः अपि भगच्चिन्तनया नश्यति। मरणं कदा आगमिष्यतीति कोऽपि न जानाति। अतः अलोचन प्रादुर्भावादेव दैवचिन्तनप्राप्तये यत्नः कर्तव्यः।

विशेषांशः - अयं श्लोकः ब्रह्म ज्ञनोपदेशघट्टे अन्ते उक्तत्वात् वृद्ध भक्तेषु श्रीकृष्णभगवान् करुणारसं प्रसारितवान् स्यात्। यतः यौवनं, उद्योगः, अधिकारः स्वाधीनधनस्य सर्वसमाप्त्यनन्तरं वार्धक्ये पुण्यविशेषेण मोक्षकाङ्क्षा यदि स्यात् तदा यत्किमपि साधनं कर्तुं सामर्थ्याभावस्थितिः सञ्जायते। तादृशेषु करुणया अयमुपदेशः दत्तः। प्राणप्रयाणकालासन्ने भगवच्चिन्तनध्याने पर्याप्ते भवतः इति। तादृशेभ्यः ब्रह्मसाक्षात्कार ज्ञानं निर्वाणप्राप्तिश्च भवेदिति भगवाननुग्रहरूपेण एव मुवाच।

सङ्कीर्तनम्

तथा कुरुष्वमुदामामद्यैव त्यजितानुबन्धधर्म मम
अथोक्षजस्ते अनुदासोऽहम् भुजकृतां पुरा प्रतिज्ञाम्
तवास्मि शरणं दहराहं वृजिनैर्मोक्षयिष्यामीति
भवदुरितानि भञ्ज मम चिन्तितं मया श्रीवेङ्कटेश
भुवि कृतञ्च या पुरा प्रतिज्ञां किन्तु त्व मयि कृपां कुरु
जवन ददामि सर्वेभ्य इति तन्तुहि पुराकृतं प्रतिज्ञाम्
व्रजामि शरणं वरद तवाहं अन्तगतिं नयामीति महि।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३८)

सम्पादकीयम्

धर्मस्य परिपूर्णनिदर्शनं श्रीरामः

भारतीयसंस्कृतौ पर्वदिनानि न केवलं आचारमात्रपरिमितानि। तानि अस्मज्जीवन विधिं सम्यक्तया परीक्षितुं नकेवलं अवकाशप्रदानि भवन्ति अपि तु, एतादृशेषु पर्वदिनेषु श्रीरामनवमीपर्वदिनं अयोध्याधिपतेः श्रीरामस्य अवतारपुण्यदिनम्। किं नाम धर्मः, आदर्शजीवितं कथं भवितव्यम्, इति प्रश्नयोः समाधानरूपत्वेन धर्मशब्दः सन्दृश्यते। अतः एव ''रामो विग्रहवान् धर्मः'', धर्मस्य परिपूर्णोदाहरणं रामः एव इत्युच्यते।

श्रीरामः न केवलं राजा, आदर्शपुत्रः, आदर्शभर्ता, आदर्शसोदरः, आदर्शमित्रमिव राराजते। पितृवाक्यपरिपालनार्थं राज्यं परित्यज्य वनवासं स्वीकुर्वतः तस्य त्यागबुद्धिः, सत्यनिष्ठेत्याद्युत्तमोत्तमगुणाः आधुनिक समाजस्य अत्यन्तमावश्यकानि। अधिकारः, सम्पत्, स्वार्थमित्येतत्साधनार्थं अमूल्यादर्शगुणान् दूरीकुर्वदेतद्दिनेषु ''धर्मो रक्षति रक्षितः'' इतीदं सत्यं स्वजीवितेप्रदर्शितमहानुभावः श्रीरामः। रामायणं केवलमितिहासमात्रं अपि च जीवनशास्त्रम्।रामायणे प्रतिपात्रं एकं आदर्श सदूबोधोपविशिष्टम्। सीतायाः सहनं, लक्ष्मणशत्रुघ्नयोः सेवाभावः, हनुमतः भक्तिः, भरतस्य त्यागः, एते सर्वे सद्गुणाः मनुष्यत्व धर्मानस्माकं बोधयन्ति। अत एव श्रीरामः न केवलं देवालयेषु, प्रजाहृदयेषु चिरस्थायी तिष्ठति। श्रीरामनवमी सन्दर्भं पुरस्कृत्य अस्माभिः न केवलं पूजाव्रताचरणपरिमितैः न भाव्यम्, अपि तु श्रीरामस्य आदर्शान् अस्मद्दैनन्दिनजीविते आचरितुं पूर्णसंकल्पवद्भिः भाव्यम्। सत्यन्यायकर्तव्यनिष्ठामूल्यानि पुनरुद्धरणार्थं अस्माभिः समाजे धर्मप्रभां वर्धयितुम् प्रतिज्ञावद्भिः भाव्यम्।''श्रीरामचन्द्रपरब्रह्मणे नमः'' इमाः एव अस्माभिः श्रीरामचन्द्रस्य समर्प्यमाणनमस्सुमाञ्जलयः।

आन्ध्राणां अयं मासः आरम्भचैत्रमासः। इदं पर्वदिनं युगादि अथवा उगादि इति सम्प्रदायपद्धत्या आचरणं अनादिकालात् प्रवर्तते। प्रभवादिषष्ठिवर्षेषु चत्वारिशत्संख्यायुतपराभवनामसंवत्सवरे वयं प्रविशामः। गतविश्वावसुसंवत्सरे अनुभूतमधुरातिमधुरचिह्नानि सिंहावलोकनं कुर्वन्तः नूतनवर्षे क्रियमानकर्माणि सम्यक् विघातप्रतिबन्धकैर्विना भवितव्यानीति देवदेवं श्रीवेङ्कटेशं प्रार्थयिष्यामः। (३२००० संख्याक) द्वात्रिंसत्सहस्र सङ्कीर्तनकारस्य पदकवितापितामहस्य द्रविडागमसार्वभौमस्य वाग्गेयकारस्य श्रीमत्ताल्लपाकान्नामाचार्यस्य ५२३ वर्धन्तीदिनमपि अस्मिन् मासे फाल्गुण बहुलद्वादश्यां ति.ति.देवस्थानं अङ्गरङ्गवैभवोपेततया तिरुपतिक्षेत्रे अन्नमय्यजन्मस्थानभूतकडपजिल्लाताल्लपाकग्रामे च निर्वहणं सम्प्रदायः। दशदिक्सु व्याप्ततत्सङ्कीर्तनानि स्मरन्तः वयं तस्य घननमस्सुमाञ्जलीः समर्पयिष्यामः।

तिरुमलसप्तगिरिषु बहूनि पवित्रतीर्थानि वर्तन्ते। तेषु अत्यन्तमहिमान्वितं कुमारधारातीर्थम्। एतत्तीर्थ मुक्कोटिरपि अस्मिन्मासे आगच्छतीति मुदावहोऽयं विषयः। वर्षे एकवारं फाल्गुणपौर्णिमीसन्दर्भे प्रकृतिसौन्दर्य मध्ये निर्वाह्यमानकुमारधारातीर्थमुक्कोटिं स्नदृश्य स्नानाचरणं भक्तानां प्रत्येकानुभूतिरिति भावयन्ति।

लक्ष्मीजयन्ती, मात्स्यजयन्ती, होली, धर्मराजदशमीपर्वाणि, तिरुपतिकोदण्डरामस्वामिनः, वाल्मीकिपुर श्रीपट्टाभिरामस्वामिनः ब्रह्मोत्सवाः, तिरुमलक्षेत्रे श्रीपतेः वसन्तोत्सवाः अस्मिन् मासे आगमनं विशेषः। सर्वेभक्ताः आगच्छन्तु, तरन्तु। एषु उत्सवेषु भक्तिश्रद्धाभ्यां भागस्वामिनः भूत्वा तत्तत्सवामिनां कृपायाः पात्राणि भवन्तु।

।।ओं नमो वेङ्कटेशाय।।

धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः।

मार्च् - २०२६

सम्पुटिः-१२ सञ्चिका-१२

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर फाल्गुणशुद्धत्रयोदश्यां भानुवारादारभ्य-श्रीपराभवनामसंवत्सरचैत्रशुद्धत्रयोदश्यां-भौम्यवारपर्यन्तम् - २०२६

लक्ष्मीजयन्ती 06
- डा पि.माधवी

भक्तिपराकाष्टायाः पुत्रबलिरेव महात्यागः परोपकारार्थमिदं शरीरम् 08
- डा जि.चन्द्रशेखर्

अन्नमाचार्यसङ्कीर्तनेषु वात्सल्यभक्तिः 09
- डा के.कोटेश्वरय्य

श्रीकूरेशप्रणीत श्रीस्तवः 11
- आचार्य जि.पद्मनाभम्

मत्स्यजयन्ती 15
- डा वि.माधवरेड्डि

भगवद्दर्शनात् चोरबुद्धेः परिवर्तनात् मोक्षप्राप्तिः 18
- डा एन्.गुणवती

मातृप्रेम माधवमपि वशीकरोति (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः

मुखचित्रम् - श्रीसीतादेवी सहित श्रीकोदण्डरामस्वामी, ओण्टिमिट्टा।

अन्तिमपुटचित्रम्:- श्रीवेङ्कटेश्वरस्वामिना सह अन्नमाचार्यस्य वर्णचित्रम्।

सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते सम्पर्कं कुर्वन्तु -

editorsapthagiri@gmail.com

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

वेङ्कटाद्रिसमं स्थानं
ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो
न भूतो न भविष्यति ॥

तिरुमलतिरुपतिदेवस्थानम्

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,(F.A.C.)
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः(F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
– प्रधानसम्पादकः



- डा पि.माधवी,
चरवाणी - ८५१९८०४७८४

मार्च् ३ तिथौ लक्ष्मीजयन्तीं पुरुस्कृत्य लक्ष्मीतत्त्वं, लक्ष्मीमाहात्म्यं स्तोत्राण्यत्र प्रदर्श्यन्ते।

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्तदेववनितां लोकैकदीपाङ्कुरां ।
श्रीमन्मन्दकटाक्षलब्ध-विभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्।।

विद्यादेवतारुप सरस्वत्यपेक्षया सम्पत्प्रदात्रीं लक्ष्मीं सामान्यप्रजाः उपासते। सर्वपोषकस्थितिकारक किष्णुभार्यात्वात् तस्य शक्तित्वात् इयं बहुसम्पत्प्रतीका वेदेषु श्रीलक्ष्मीः इत्यादिनामभिः स्तूयमानेयं सम्पददृष्टशक्ति सौन्दर्यप्रतीका। श्रीः लक्ष्मीः एकैव सारबलोत्पत्तिशक्तेः जलव्यवसायाधिदेवतेति भावयन्ति केचित्। पुराणान्यनुसृत्य इयं भृगुख्यातिसन्ततिः। अन्यस्मिन् कल्पे क्षीरसागर मथनसमये आविर्भूता। विष्णुभार्यात्वात् दशावतारेषु भगवदवतारेण सह इयमप्यवतरति। वामन परशुरामरामकृष्णवतारेषु पद्मा, कमला, धरणी, सीता रुक्मिणीव अवतताः। वागर्थयोः बुद्धिज्ञानयोः, सत्कृत्य धार्मिकप्रवर्तनयोः यादृशाविनाभावसम्बन्धः वर्तते विष्णुलक्ष्मीदेव्योः तादृशनुबन्धः वर्तते। विष्णुः समस्तपुरुष प्रकृतेः, लक्ष्मीः समस्तस्त्रीप्रकृतेः प्रतीके भवतः।

इयं एकस्मिन् पद्मे स्थिता अतिलोकसौन्दर्येण द्वयोः हस्तयोः पद्मैः शोभमाना दृश्यते। अत एव पद्मवाणी कमल वाणी इतीमां वदन्ति। अस्याः कण्ठे पद्ममाला वर्तते। पार्श्वे गजाः शुण्डा दण्डमुत्थाप्य कलशैः इमामभिषिञ्चन्ति। देवकन्याः अस्यै कलशान् ददतीव दृश्यन्ते। इयं नीलसुवर्णहरिद्राशुद्धश्वेतवर्णैः विराजमानेव चित्रीकुर्वन्ति। विष्णुदेवेन सहिता द्वाभ्यामेव हस्ताभ्यां वर्तते। अस्याः प्रत्येकालयाः तत्र तत्र दृश्यन्ते। तेष्वालयेषु पद्मासना पद्मालङ्कृत चतुर्हस्ता शङ्खामृतकलशबिल्वफलैर्विशिष्टेव विग्रहेषु दृश्यते। बिल्वस्थाने मातुलुङ्गफलमपि कुत्रचित् स्यात्। इयमष्टहस्ता यदि स्यात् धनुः बाण, गदा, चक्रमपि उपर्युक्तै-स्साकमनुबन्धतया स्युः। इयमेव महालक्ष्मीः दुर्गायाः प्रत्येक रूपं भवति।

इयं नीलवर्णेन विष्णुपत्नी हरिद्रावर्णेन समस्तसम्पदधिष्ठात्री श्वेतवर्णेन समस्तसृष्ट्याविर्भावहेतु शुद्धप्रकृतिरूपा पाटलवर्णन जीवेषु दयावती सर्वमातेव भाव्या भवति हस्तचतुष्टयेन चतुर्विधपुरुषार्थप्रदात्री धर्मार्थकाममोक्षाःएव हस्तचतुष्टयमिति विकसत्पद्मानि आविर्भवल्लोकान् तपस्विनां विज्ञानदशाश्च सूचयन्ति।

अस्मच्छ्रमफलमेव तदीयहस्तफलम्.....

हस्तामृतकलशः जरामरणरहित प्रसादं सूचयन्निव वर्तते। इयं भक्तेभ्यः ब्रह्मनन्दामरत्वं ददाति। कुत्रचिदियमुलूक वाहनेव दृश्यते। उलूकपदमिन्द्रमपिसूचयति। लक्ष्मीः आध्यत्मविद्यायाः अपि अतिष्ठात्री भवति।

समुद्रमथनम् - इन्द्रः दुर्वासमहर्षिं अवमान्य अपगत स्वर्गलोकसम्पदः बभूव। तस्य गर्वाहङ्कारफलिततया सम्पत् राक्षसवशीभूता। राक्षसाहाय्यादेव पुनः सम्पत्प्राप्तिर्भवेदिति विष्णुः इन्द्रं प्रेरयामास। राक्षसैः मिलित्वा समुद्रमथनात् अमृतप्राप्तिः, अमृतपानात् देवताभ्यः अमरत्वं स्वर्लोक राज्यस्य पुनः प्राप्तिश्च भवेदिति देवेतासु विश्वासं जनयामास। मन्दरपर्वतं मन्थानीं वासुकिसर्पं रज्जुं कृत्वा मन्दरपर्वतस्य अधः पतनात् निवारयितुं विष्णुः स्वयं कूर्मावतारं दधार। देवदानवैः समुद्रमथने आदौ हालाहलमुदूबभूव। शिवेन विषपानात् लोकाः आपद्रक्षिताः बभूवुः। ततः सर्वकामप्रदा

कामधेनुः, ततः उच्चैश्रवः, ततः ऐरावतगजः ततः अमूल्यकौस्तुभमणिः, ततः सर्वकामप्रदकल्पवृक्षः, ततः सर्वसम्पन्निलया लक्ष्मीः, सुराधिष्टानदेवता वारुणिः अमृतकलशेन सह देववैद्यः धन्वन्तरिः प्रादुर्भूताः। तदा ऋषयः कामधेनुं श्वेताश्वं बलिः, ऐरावतं कल्पवृक्षञ्च इन्द्रः कौस्तुभमणिं विष्णुः जगृहुः। लक्ष्मीः विष्णोः वक्षःस्थलमपेक्षितवती। दानवैः सुरायां तिरस्कृतायां देवताः तां स्वीचक्रुः। ततः अमृतं पातुं दानवाः धन्वन्तरिहस्तात् अमृतकलशं स्वाधीनं चक्रुः। स्वार्थदुराशादुर्लक्षणपूरिताः दानवाः विश्वासघाताः आसन्। तदा तद्दुर्मार्गप्रयत्नं निवारयितुं जगन्मोहिन्यवतारं धृत्वा मोहोन्मादपूरितान् दानवात् कृत्वा अमृतं देवहस्तं प्रापयामास। एवं विनूत्नशक्तिपूरिताः देवाः राक्षसान् पराजित्य स्वर्लोकं पुनः स्वाधीनंञ्चक्रुः।

बहुजनहितार्थं स्वल्पभेदान् परित्यज्य शत्रुभिरपि स्नेहं कृत्वा महत्कार्यं साधनीयमिति अनया, कथया जानीमः। महत्तरकार्यसाधनाय पयत्नोऽपि महान् भवितव्यः। एतादृश यत्ने क्रियमाणे सति सदसत्फलप्राप्तिर्भवेत्। अत एव हालाहलमादौ उद्भूतम्। दुष्फलात् देवदानवाः अविरताः संघीभूय पुरोगामिनः आसन्। कार्यसाधने ऐकमत्यमावश्यकमिति देवदानवप्रयत्नः बोधयति। देवेषु शिवः एव परिष्कारमार्गप्रदाता लोकक्षेमार्थं स्वीयसुखं परित्यज्य विषपानात् देवदानवयोः उपचकार। अत एव पश्चात् अभ्युदयसूचिका लक्ष्मीः आविर्भूता। निश्शेय-सममृतमुद्भूतम्। जगतः श्रेयः प्रेयश्च आवश्यके। समकृषिफलं रागद्वेषातीततया स्वीकर्तव्यम्। सम्पूर्णफलं विष्णुः सन्मार्गमामिनः देवेभ्यः दत्वा दुर्मार्गागामिनः मोहितान् चकार।

भिन्नरूपेषु लक्ष्मीः - शिल्पशास्त्रे अष्टलक्ष्मयः प्रसिद्धाः। गजलक्ष्मीरूपं सर्वविदितमेव। इदं रूपं द्वारबन्धेषु लिख्यते। अष्टदलपद्मं आसनीकृत्य पद्मामृतकलशमादीफलशङ्खानि हस्तचतुष्टये धारणं, करमुन्नमय्य जलाभिषेककारिणः गजाः पार्श्वद्वये स्थितिः लक्ष्म्याः कमनीयविग्रहे द्योत्यते। हस्तद्वयेनेयं सामान्यलक्ष्मीः इन्द्रलक्ष्मीः इत्याहूयते। हस्तद्वयेन पद्मद्वयं, शिष्टहस्तद्वये अभयमुद्रात्वे वरलक्ष्मीरिति वदामः। अन्यमूर्तीनां एतादृशप्राधान्यं नास्ति।

अलक्ष्मीः - लक्ष्मीदेव्याः विरुद्धा अलक्ष्मीः। इयमपि समुद्रमन्थनादेव लक्ष्मीदेव्याः पूर्वं अवततार। अत एवेमां ज्येष्टादेवीति वदन्ति। ''असह्यः'' इमां पर्यणैषीत्। अस्य सन्तानमधर्मः, अस्याः वाहनं वृद्धगार्दभः। सम्मार्जनीहस्तायाः अस्याः ध्वजः काकः। इयं मूर्तिः केमिदेवालयेषु दृश्यते। असह्यभावनया विना आराधनात् हानिकरान् दूरीकृत्य सौभाग्यं प्रसादयति इति वदन्ति।

लक्ष्मीस्तोत्राणि : - लक्ष्मीमधिकृत्य बहूनि स्तोत्राणि वर्तन्ते। लक्ष्मीं क्षीरसमुद्रतनयां ..... इत्यादि ऋग्वेदान्तर्गतश्लोकत्रयं महालक्ष्मष्टकमिति इन्द्रकृतमहालक्ष्मीःचतुर्विंशतिनामावलिः ऋणविमोचनश्लोकः एकः, शङ्कराचार्य विरचितकनकधारास्तोत्रं वन्देमन्दारुमन्दार.... इत्यादि चतुर्विंशतिश्लोकात्मकम्, श्रीमहालक्ष्मीध्यानं लक्ष्म्यष्टोत्तरशतनामावलिः, वन्देपद्माकरामित्यादि त्रयोविंशतिश्लोकात्मकम् पराशरमहर्षिकृतं महालक्ष्मीस्तोत्रं ''अनाद्यनन्तरूपमित्यादि अष्टश्लोकात्मकं, दारिद्रयनाशमन्त्रमेकम्, अहिर्बध्यसंहितायां श्रीलक्ष्मष्टकमिति अष्टश्लोकात्मकं, धनदादेवीनम्ना सप्तश्लोकाः लक्ष्मीस्तोत्र नाम्ना श्रीर्लक्ष्मीः ''कल्याणीत्यादि'' षड्विंशतिश्लोकाः, महालक्ष्मीमन्त्रं, अगत्स्यमहर्षिकृत जयपद्मविशालक्षीत्यादि चतुर्विंशति श्लोकाः, देवकृत क्षमस्वभगवतीत्यादि चतुर्दशश्लोकाः, अग्निपुराणान्तर्गत-राजलक्ष्मीस्थिरत्वाय इत्यादि एकोनविंशति श्लोकाः, देवेन्द्रकृत ''नमः कमल इत्यादि सप्तदशश्लोकाः लक्ष्मीकवचनाम्ना ब्रह्मोक्त सप्तदश श्लोकाः, ब्रह्मवैवर्तपुराणान्तर्गत'' महालक्ष्म्याः इत्यादि त्रयोविंशति श्लोकाः, लक्ष्मीकवचमिति हरिणा इन्द्रायोपदिष्ट-सप्तश्लोकाः, वेदान्ताचार्यकृतौ वेङ्कटनाथ श्रीस्तुः मानातीवेत्यादि पञ्चविंशति श्लोकाः लक्ष्मीस्तवः इति नाम्ना त्रयोदशश्लोकाः, वरमहालक्ष्मीस्तुतिनाम्ना देवेन्द्रकृतचतुस्त्रिंशत् श्लोकाः, श्रीलक्ष्मीद्वादशनामस्तोत्रनाम्ना आदि, धान्य, धैर्य, गज, सन्तान, विजय, विद्या, धनलक्ष्मी प्रार्थना नाम्ना एकादशश्लोकाः क्षमाप्रार्थनाश्लोकाः त्रयः इत्येवं बहूनि स्तोत्राणि महर्ष्यादिभिः कृतानि बहूनि स्तोत्राणि, रामकृष्णमठप्रचुरित लक्ष्मीस्तोत्रग्रन्थे दृश्यन्ते। अस्मिन् वर्षे २०२६ मार्च् तृतीय तिथौ लक्ष्मीजयन्तीति ति.ति.देवस्थान कालमानपट्टिकायां निर्दिष्टम्।''यत्र शुचिस्तत्रलक्ष्मीः''। भारतदेशे प्रधानमात्याः मोडीमहाशयाः अपि अशुचिनिवारणार्थं समुचितादर्शान् लक्ष्मीकलां वर्धयितुं सूचयामासुः।

- डा जि.चन्द्रशेखर्
चरवाणी
९४९१७४५५०६

भक्तिपराकाष्टायाः पुत्रबलिरेव महात्यागः परोपकारार्थमिदं शरीरम्

काञ्चीपुरे चिरुतोण्डनम्बिनामकवैश्यकुलखेखरः आसीत्। सः अखण्डशिवभक्तितत्परः। तस्य भार्यायाः नाम तिरुवेङ्गनाञ्चि। जङ्गमाराधवतत्परयोः तयोः पुत्रः सिरियालः। पूर्वजन्मवासना विशेषात् चिरुतोण्डः एकाम्रनाथमाराधयन् जङ्गमप्रधानेभ्यः मनोवञ्चनया विना अर्थितपदार्थान् ददन् अन्नदानमाचरति स्म। कदाचित् परमशिवः पार्वती देव्यै चिरुतोण्डनम्बिनः भक्तिप्रभावं निरूपयितुमैच्छत्। इन्द्रमाहूय काञ्चीनगरे निरन्तरं वर्षं वर्षापयितुमाज्ञां ददौ। कुम्भवर्षात् पचनदार्वभावात् चिरुतोण्डनम्बी अनन्तवस्त्रण्येव तैलार्द्राणि कृत्वा अग्निदग्धानि कृत्वा पाचयित्वा शिवभक्तेभ्यः अन्नदानं करोति स्म। एकविंशतिदिन पर्यन्तं वर्षापातात् जङ्गमयोगिनः नगरं परित्यज्य गताः। अन्नदानस्वीकरणाय एकोऽपि शिवयोगी न लब्धः। ग्रामबाह्यप्रदेशे शिथिलदेवालये रुद्राक्षमालिकां धृत्वा त्रिपुंड्रालङ्कृतवृद्धः, तं सेवमाना, वृद्धा च दृष्टौ। चिरुतोण्डलम्बी तौ प्रणम्य स्वगृहमागत्य शिवार्चनं स्वीकृत्य चरितार्थं कर्तुमयाचत। वृद्धः तस्य आशीषं दत्वा तस्य वंशसन्तानमपृच्छत्। ततः सप्तदिनेभ्यः निराहारव्रतमवलम्बामीति व्रतोद्यापनाय यागपशुः नरः एव भवितव्यः, सः ब्राह्मण क्षत्रियवैश्येष्केकः सुन्दरः रोगविहीनः भवितव्यः, इति, तं युवकं पाचयित्वा आहारत्वेन आवयोः दत्वा आवाभ्यां सह भोक्तव्यमिति नियममवोचत्। चिरुतोण्डः भार्यायाः शिवभक्तिं जङ्गमाराधननिष्ठां, अनुल्लंघनीयाज्ञात्वर्तिनं पुत्रं मनसा स्मृत्वा भार्यायाः विषयमवोचत्। सा अस्मच्छरीरप्राणप्रदः शिवयोगीश्वरः एव। भगवद्दत्तं शरीरं भगवते समर्पणे आलोचना किमर्थमिति सा अवोचत्। झटिति पुत्रमानेतुं चिरुतोण्डनम्बी जगाम। शिवः वेषान्तरे सिरियाल पाठशालां जागम। सिरियालः जटाधारिणं दृष्ट्वा साष्टाङ्ग नमस्कारञ्चकार। सः जटाधारी बालमुद्दिश्य ''तव पिता निर्भाग्यशिवयोगिने त्वां बलिं दातुमिच्छति। एतादृशपुत्रघातकः यत्रकुत्राप्यस्ति वा इत्यवोचत्। सिरियालः शरीरधनव्ययः भगवते जन्मसार्थक्यायैव इत्यवोचत्। शिवः अयं बालः परार्थत्यागे पितुरिधकः इति मत्वा जगाम। चिरुतोण्डः शिवयोगिनं स्वभुजस्कन्धे निवेश्य अन्धवृद्धया सह तद्गृहं जगाम। ततः स्नानं कारयित्वा नूतन वस्त्राणि ददौ। शिवाज्ञया पार्वतीदेव्यपि सद्यःप्रसूत स्त्रीवेषे आगत्य चिरुतोण्डनम्बिभार्यां तिरुवेङ्गनोञ्चीं मुद्दिश्य समीप्य मातः। युवां दम्पती पुत्रं बलिरूपेण दुर्मार्गयोगिने आहारत्वेन दातुं संसिद्धाविति शृणोमि। पुत्रहनन बुद्धिः पितुः कथमागता सः वृक्षः वा इत्यपृच्छत्। तदा सा शिवशिवयोगिमध्ये भेदो नास्ति। शिवः एव कर्ता भोक्ता। अस्माकं प्राणाः शिवाधीनाः इति गच्छ गच्छेत्युवाच। विफलप्रयत्ना पार्वती अन्तर्दधौ। चिरुतोण्डनम्बी पाठशालायाः पुत्रमानीय उत्सङ्गे निधाय पञ्चाक्षरीं जपन् भव इति अत्रैव परब्रह्मार्थसिद्धिरिति उक्त्वा खड्गेन पुत्रशिरः चिच्छेद। तदा सिरियाल शिरः नमश्शिवाय इति मन्त्रं पठतिस्म अमृताहारस्वीकरणाय नम्बिदम्पती शिवं प्रार्थयामासतुः। तदा शिवः शिवा च व्रतभङ्गः भवति, त्वयापि भोक्तव्यम्। पुरुष सन्तानविहीनगृहे न भोक्तव्यम्। कुमारमाह्वय इति मायाजङ्गमः अवोचत्। तदा नः पूर्वमेवायं विषयः न प्रोक्तः, पुत्रः कुत्रचित् खेलनाय गतः इत्योवोचत्। तदा वृद्धदम्पती उच्चैः स्वरेण कुमरं आह्वयतम् इत्यवोचताम्। तदा तिरुवेङ्गनाञ्ची महास्वरेण पुत्रमाह्वयामास। तत्क्षणं सिरियालः शाकपाकेभ्यः आगत्य तत्पुरतः प्रत्यक्षीभूतः आसीत्। तदा परमशिवश्चापि निजरूपे साक्षात्कृत्य सशरीरं कैलासमागच्छतमित्यवोचत्। तदा नम्बी सहस्रगोत्रवैश्याः ईश्वराराधनपराः। तान् परित्यज्य नाहं कैलासमागमिष्यामीत्यवोचत्। तदा शिवः करुणया सर्वकाञ्चीवैश्येभ्यः कैलासं प्राप्तुं वरं ददौ। एवं चिरुतोण्डनम्बी पुत्रबलिदानायापिसुमुखः स्वपुरजनेभ्यः अपि मोक्षप्रदाता भूत्वा ''परोपकारार्थमिदं शरीरमि''ति महोन्नतत्यागबुद्धिगुणं प्रदर्शयामास।

केवा न स्युः परिभवपदं निष्पलारम्भयत्नाः।

अन्नमाचार्यसङ्कीर्तनेषु वात्सल्यभक्तिः

- डा.के.कोटेश्वरय्य
चरवाणी-९९८५१२३२६२

कलियुगे भगवन्तं प्राप्तुं सुलभतरमार्गः भक्तिमार्गः। भक्तिमधिकृत्य भगवद्गीतायां नारदभक्तिसूत्रेषु श्रीभागवते सम्यक् प्रामाणिकतया चर्चितम्। भागवते नवरसभक्तिभेदास्सन्ति। तथापि नारदभक्तिसूत्रेषु एकादशभक्ति भेदाः प्रदर्शिताः। ताल्लपाकान्नमाचार्यः इतोधिकतया भक्तिभेदान् एवं वितृणोति। उन्मादभक्तिः, पतिव्रताभक्तिः, विज्ञानभक्तिः, आनन्दभक्तिः, राक्षसभक्तिः, निर्मलभक्तिरिति इतोधिकभक्तिभेदान् वर्णयति। सर्वभक्तिभेदसमग्रपरिशीलनात् सद्यः फलप्रदा वात्सल्यभक्तिरेवेति वक्तुं शक्यते। मानवदैहिकदशासु, वार्धक्यमपि प्रधानम्। वेदान्तिभिः ''संसारेमे मेलु'' सकल जनुलकुनु, कंसान्तकभक्तिकलिगिते चालु'' इति प्रोवाच। महाभक्तः सङ्गीतसाम्राट् त्यागराजस्तु संसारुलैते एमय्य शिखिपिंछावतंसुनिभक्तिकलिगितेचालनि'' निर्द्वन्दं प्रकटीचकार। सांसारिकजीविते शिशूदयः महात्स्थानमाक्रमति। अस्मिन् मातापितरौ बन्धुजनाः, परिचिताः आनन्दानुभूतिं प्राप्नुवन्ति। श्रीमद्भागवते पोतनामात्यः ''अनुदिनसन्तोषणमुलु जनितश्रमतापदुःखसंशोषणमुलु इति प्रोवाच। एतादृशदशायां वात्सल्यानुभवः प्रथमदशा भवति। धेनुः वत्सजननान्तरं महाप्रीत्या वत्सस्यदेहं जिह्वया क्षमया शुचीकुर्वन्ती अन्यं समीपंप्राप्तुं ऋणद्धि। वत्सदर्शनाभावे अम्बा इति रौति। अत एव धेनुः पूज्या पवित्रा भवति। इमामेव वात्सल्य भक्तिरिति वदन्ति। महाविष्णोः दशावतारेषु रामकृष्कावतारे इदं वात्सल्यमधिकतया दृश्यते। मायामानुषविग्रहरामवात्सल्यादपि श्रीकृष्णवात्सल्ये भक्तानामत्यन्तानुभूतिः जायते। ग्रामजीवनमेव एतस्य कारणम्। ग्रामजीवने श्रीकृष्णः बहुराक्षसान् जघान। तस्यामेव बाल्यदशायां व्रेपल्लेवासिनां बहुविधानन्दानुभूतिं ददौ। एतादृशानुभूतिवर्णनानि द्राविडप्रबन्धेषु विशिष्य विष्णुचित्तस्य पाशुरेषु, कर्णाटकसङ्गीतपितामहपुरन्ददास रचनासु हिन्दीभाषायां सूरदासुरचनास्वपि विशदतया दृश्यन्ते। संस्कृतभाषायां कृष्णकर्णामृतमेव एतेषां सर्वेषां मार्गदर्शकं भवति।

ग्रामवासी ताल्लपाकान्नमाचार्यः बालकानां मनस्तत्वं, तेषां भिन्नभिन्नचेष्टाः परस्परबालविवादान्, तेषां अनन्दप्रदाः भिन्नभिन्नचेष्टाः परस्परबालविवादाः आक्रन्दनानि मातृसकाशे रोदनानि, सम्यक् रमणीयातया वर्णयामास। एकवर्षवयो दशायां बालबालिकाः अन्नं खादितुं मातुः बहुक्लेशंकारयन्ति। माता कथञ्चित् बालैः अन्नं खादयितुं बालकान् बहिरानीय चन्द्रबिम्बं दर्शयन्ती तद्दर्शन-निमग्नेषु अन्नं कथञ्चित् खादयति। एतादृशभावनाभिः अन्नमाचार्यः ''चन्दमामपदानि चन्दमामरावे जाबिल्लिरावे इत्यादीनि व्यरचीत्। बालानां जलमभीष्टम्। बालेभ्य जलकुम्भे प्रतिबिम्बं, दर्शयन्ति। जले स्वप्रतिबिम्बे दृष्टेऽपि ''अन्यबालकः सः इति खेलनाय आह्वयन्ति। परन्तु प्रतिबिम्बबाले अनागते कुम्भजलं

संस्पृश्य तं कुम्भगतबालं स्वहस्तगतं कर्तुं यतन्ते। श्रीकृष्णबाल्यचेष्टाभिः व्याकुलाः गोपिकाः तस्मिन् निन्दारोपणं कुर्वन्ति यशोदा माता पुत्रप्रेम्णा स्वपुत्रस्य दोषाः न सन्तीति यशोदा समुचितसमाधानं ददाति। ''कानरटे पञ्चरटे कट कट वीडिलनु'' इति अन्नमाचार्यः स्वकीर्तनेषु वर्णयामास। मत्पुत्रं मा निन्दीकुरुत। बाह्यप्रदेशे, दधिधृतभाण्डनिवेशनं युष्मद्दोषः एवेति यशोदा गोपिकाः निन्दन्ती स्वपुत्रेदोषः नास्तीति वदति। मातुः पुत्रप्रेम अपारम्। यशोदा कृष्णं मत्पुत्रः नवरत्नसमः इति वदति इयं भावना ''मुद्दगारे यशोदमुंगिट मुत्युमुवीडु इति कीर्तने स्पष्टं भवति। स्वपुत्रं यशोदा अन्यस्पर्शेभ्यः दूरीकर्तुं ''सारेकु अंटकुरे'' इति कीर्तने पुनः पुनः बाले स्पृष्टे बालः चैतन्यरहितः स्यादिति, अकाशे पक्षिणः सायं समये बालं हर्तुमागमिष्यन्तीति वदति। पक्षी नाम गरुत्मानेव। सः स्वस्वामिसेवार्थ मागमिष्यतीति तस्याः अन्तरार्थ भावना। शङ्कराचार्येण ''बालस्तावत्क्रीडासक्तः'' इति कथनं सत्यवचनम्।

इमां वात्सल्यभक्तिं अन्नमय्य, विष्णुचित्तः, बिल्वमङ्गलादयः सम्यक् वर्णयामासुः। आन्ध्रचलनचित्रेष्वपि ''बालदर्शनं ब्रह्मदर्शनं, बालकृष्णलीलाः

भक्तकोटि - आनन्दप्रदाः इति गीताः सन्ति।

करारविन्देनपदारविन्दं मुखरविन्दे विनिवेशयन्तं।
वटस्य पत्रस्य मुखेशयनं बालं मुकुन्दं मनसा स्मरामि।।

श्रवण भक्तिः - नवविधभक्तिभार्गेषु श्रवण भक्तिः अत्युत्तमा। पञ्चेन्द्रियेषु कर्णेन्द्रियं अतीव प्रधानम्। श्रवणभक्तिरित्युक्ते परीक्षितं वयं स्मरामः। खट्वाङ्गः घटिकाद्वये मरणमिति ज्ञात्वा गोविन्दकथश्रवणं प्राप्यमुक्तिमवाप। परीक्षित् द्वादशसकन्धमहाभागवतं श्रुत्वा मुक्तिमवाप। कलियुगजीविनां श्रवणभक्तिरेव प्रथमोपायः। भगवत्कथाश्रवणं इहपरसाधनम्। सूतः शौनकादिमहामुनिभ्यः बहुपुराणादीन् श्रावयित्वा तेभ्यः मुक्तिकारको बभूव। भूलोके भागवद्व्याप्तेः कारकः नारदमहर्षिः प्रह्लादं ध्रुवं भागवतभक्ति कथाः श्रावयित्वा मुक्तौ चकार। नारदस्य भक्तिसूत्राणि श्रुत्वा वयं तदनुसृत्य मुक्तिं प्राप्नुमः। अन्नमय्य, त्यागत्य वाग्गेयकारजीवनेषु पूर्णत्वं दत्वा ऋषिकल्पाः बभूवतुः। नारदोऽपि प्रथमजन्मनि दासीपुत्रः सकाले चातुर्मास्यदीक्षितमहनीयसत्कथाः श्रुत्वा पापदूरः स्वयं स्वभक्तिप्रचारद्वारा लोकत्रयप्रसिद्धः भगवत्प्रियः बभूव। साधनचतुष्टये किरातजीवनात् पशुत्वात् ऋषित्वमवाप। ''आकटिवेल, अलपैनवेललनु तेकुव हरिनाम श्रवणमेदिक्कु मरलदु'' इति अन्नमय्य वचनम्। ''नामश्रवणादन्योपायो नहि पश्यामो भवतरणे इत्युक्तम्। वेन्नुनिनाममे विमलौषधम् विनरोभावमु विष्णुकथा वेणुबलमदिगो विष्णुकथा'' इति अन्नमय्य वचनानि। श्रवणे भगवल्लीलाश्रवणं मुक्तिमार्गे प्रधनमित्युक्तम्। वेदानां श्रुतयः इति नाम प्रसिद्धः। आदौ वेदमन्त्राः श्रवणद्वारैव मुक्तिप्रदाः आसन्। एवं भागवतश्रवण भक्तिःमुक्तिप्रधाने अत्यधिक प्राधान्यं वहतीति कथनं जगत्प्रसिद्धम्।

कोहिनामा भगवता सन्दिष्टं विकल्पयति।

श्रीनिवासमङ्गापुरम्

श्रीकल्याणवेङ्कटेश्वरस्वामिनां पुष्पयागमहोत्सवः

15.03.2026

श्रीकूरेशप्रणीत श्रीस्तवः

अवतारिका - कूरेशाः श्रीमद्रामानुजाचार्याणां आन्तरङ्गिकशिष्याः। विशिष्टद्वैतमतप्रचारं कृत्वा आचार्यपरम्परायां मिलिताः। एतैः पञ्चस्तवीति नाम्ना ग्रन्थः विरचितः। अत्र श्रीस्तवः एकं महार्घं मौक्तिकम्। अयं स्तवः लक्ष्मीस्वरूपिण्याः श्रीरङ्गस्थितायाः श्रीरङ्गनायकीदेव्याः वैभवं विवृणोति। श्रीस्तवः वेदोक्तश्रीसूक्तं विष्णुपुराणस्थेन्द्रकृतश्रीस्तुतिं यामुनाचार्यस्य चतुश्श्लोकीविषयान् मनोहरतया विवृणोति। श्रीलक्ष्मीजयन्तीसन्दर्भं पुरस्कृत्य सप्तगिरि भक्तपाठकेभ्यः इदं स्तोत्रं बहुमतिरूपेण दीयते।

कूरेशस्तुतिश्लोकः (तनियन्)

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम्।।

यस्य सूक्तयः वेदमातृकण्ठे मङ्गलसूत्रमिव भासन्ते तं श्रीवत्सचिह्नमिश्रं मनसा वाचा कर्मणा नमस्करोमि।

❀❀❀

स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थितीः
स्वर्गं दुर्गतिमापवर्गिकपदं सर्वञ्च कुर्वन् हरिः।
यस्याः वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलम्
क्रीडेयं खलु नान्यथाऽस्य रसदास्यादैककरस्यात्तया।।१।।

भावः - श्रीहरिः लक्ष्मीदेवीं दृष्ट्वैव लोकसृष्टिस्थितिलयकारी स्वर्गनरकलोकौ मोक्षञ्च ददाति। तन्मनोभावानुगुणतयैव सर्वकार्याणि करोति। लक्ष्मीदेवी तद्भगवति एकाभिप्रायत्वादेव सर्वापीयं सृष्टिः तयोरानन्दप्रदखेलनमेव। तादृशश्रीदेवी अस्माकं श्रेयः दिशतु।

हे श्रीदेवि! समस्तलोक जननि। त्वां स्तोतुमीहामहे
युक्तां भावय भारतीं प्रगुणय प्रेमप्रधानांधियम्।
भक्तिं बन्धय नन्दयाश्रितमिमं दासं जनं तावकं
लक्ष्यं लक्ष्मि! कटाक्षवीचिविसृतेस्ते स्याम चामी वयम्।।२।।

भावः - हे लक्ष्मीदेवि! सर्वलोकमातारं त्वां स्तोतुं युक्तवाचः देहि! भक्तिप्रधनं ज्ञानं वृद्धिंञ्च दत्वा अस्मान् त्वद्दासत्वेन परिगणय्य अस्माकं सर्वेषां आनन्दं प्रदत्त। मातः त्वत्करुणाकटाक्षावीक्षणतरङ्गव्याप्तेः त्वद्दसानस्मान् लक्ष्यं करोः।

स्तोत्रं नाम किमामनन्ति कवयो यदन्यदीयान् गुणान्
अन्यत्रत्वसतोऽधिरोप्य फणितिः सा तर्हि वन्ध्या त्वयि।
सम्यक्सत्यगुणाभिवर्णनमधो ब्रूयुः कथं तादृशी
वाग्वचस्पतिनाऽपि शक्यरचनात्वत्सद्गुणार्णोनिधौ।।३।।

भावः - मातः! एकव्यक्तिगतगुणानन्येषु सन्तीव वर्णयित्वा इदमेव स्तोत्रमिति भावयन्ति। तादृशस्तोत्रं त्वद्विषये न वयं कुर्मः। कुतः इति चेत् महद्वैभवोपेतत्वद्गुणान् बृहस्पतिः कथं वर्णयिष्यति। अतः त्वत्कृपयैव त्वस्तुतिः साध्या भवति।

ये वाचां मनसां च दुर्ग्रहतया ख्याता गुणास्तावकाः
तावेव प्रति साम्बुजिह्ममुदिता है मामिका भारती।
हास्यं तत्तु न मन्महे न हि चकोर्येकाऽखिलां चन्द्रिकां
नालं पातुमिति प्रगृह्य रसनामासीत सत्यां तृषि।।४।।

भावः - हे लक्ष्मीदेवि! त्वद्गुणाः मनोवाचामपि दुग्राह्यप्रसिद्धिं गताः। तादृशगुणवर्णनं महानन्दप्रदं मम। तादृशभावना हास्यास्पदा इति न भावयामि। कुतः इति चेत् एका चकोरी अखिलां चन्द्रिकां पातुं नालमिति रसनां प्रगृह्य वर्तते। तथैवाहमपि यथाशक्ति त्वद्गुणगानं कृत्वा आनन्दं प्राप्स्यामि।

क्षोदीयानपि दुष्टबुद्धिरपि निस्स्नेहोऽप्यनीहोऽपिते
कीर्तिं देवि! लिहन्नहं न च बिभेम्यज्ञो न जिह्रेमि च।

दुष्येत्सातु न तावता न हि शुना लीढाऽपि भागीरथी
दुष्येत् श्वापिऽन लज्जते न च बिभेत्यार्तिस्तु शाम्येच्छुनः।।५।।

भावः - हे देवि! त्वामधिकृत्य किमप्यज्ञातोऽहं निर्भीकः निस्स्नेहः अनीहोप्यहं तव कीर्तिं स्तुवन् आनन्दं प्राप्तुमिच्छामि। तावता तव कीर्तिः न दुष्येत्। यतः पावनगङ्गायां लीढापि श्वाः अप्राप्तदाहार्तिरपि न लज्जते न बिभोति तथापि गङ्गा अपवित्रा न भवति।

ऐश्वर्यं महदेव वाऽल्पमथवा दृश्येत पुसां हि
यत्तल्लक्ष्म्याः समुदीक्षणात्तव यतस्सार्वत्रिकं वर्तते।
तेनैतेन न विस्मयेमहि जगन्नाथोऽपि नारायणोधन्यं
मन्यत ईक्षणात्तव यतः स्वात्मानमात्मेश्वरः।।६।।

भावः - मातः! मानवेभ्यः महदैश्वर्यं अल्पं वा त्वकटाक्षादेव लभ्यते। अत्र आश्चर्यं किमपि नास्ति। यतः समस्तविश्वशासकः प्रभुः श्रीमन्नारायणः त्वत्कटाक्षादेव आत्मानं धन्यं मन्यते।

ऐश्वर्यं यदशेषपुंसि यदिंद सौन्दर्यलावण्ययोः
रूपं यच्च हि मङ्लं किमपि यल्लोके सदिच्यते।
तत्सर्वं त्वदधीनमेव यदतः श्रीसत्यभेदेन वा
यद्वा श्रीमदितीदृशेन वचसा देवि! प्रथामश्नुते।।७।।

भावः - हे लक्ष्मीदेवि! सर्वेभ्यः जीविभ्यः प्राप्यमानसम्पत् सौन्दर्यं लावण्यं, मङ्गलं एतानि सर्वाणि त्वद्दययैव लभ्यन्ते। अतः एव तत्सङ्केते त्वन्नामस्थ श्रीः, श्रीमत्पदमुपयुज्यैव लोके व्यवहरन्ति।

देवि! त्वन्महिमावधिर्नहरिणा नाऽपित्वया ज्ञायते
यद्यप्येवमथऽपि नैव युवयोस्सर्वज्ञता हीयते।
यन्नास्त्येव तदज्ञतामनुगुणां सर्वज्ञतायाः विदुः
व्योमाम्भोजमिदन्तया किल विदन् भ्रान्तोऽयमित्युच्यते।।८।।

भावः - हे देवि! यथातथं स्तोतुं तव वैभवं त्वया वा त्वभर्त्रा हरिणा वा न शक्यम्। तथाऽपि तव सर्वज्ञता न हीयते। यतः लोके स

र्वपदार्थेषु तव वैभवमेव वर्तते किल। यथा गगन पद्मं शून्यं भ्रान्तिजनकं तद्वत् त्वद्गुणाशेषज्ञानी अहमिति भान्तः एव कथयति।

लोके वनस्पति बृहस्पतितारतन्यं
यस्याः प्रसादपरिणाममुदाहरन्ति।
सा भारती भगवती तुयदीयदासी
तां देवदेवमहिषीं श्रियमाश्रयामः।।९।।

भावः - मातः! यल्लोके जीविनः जाड्यं वैदष्यं वा जन्मतः यस्याः सरस्वत्याः अनुग्रहेणैव प्राप्यते। सा सरस्वती तव दासी एव। तादृशदेवदेवमहिषीं श्रियं त्वामाश्रयामः।

यस्याः कटाक्षमृदुवीक्षणदीक्षणेन
सद्यः समुल्लसित पल्लवमुल्ललास।
विश्वं विपर्ययसमुत्थविपर्ययं प्राक्
तां देवदेवमहिषीं श्रियमाश्रयाम।।१०।।

भावः - पुर प्रलयसमये लक्ष्मीदेव्याः कटाक्षाभावात् शुष्कं जगत्, तस्याः कटाक्षसंकल्पभावात् पुनः समुल्लसितपल्लवमुल्ललास तादृशदेवदेवपट्टमहिषीं लक्ष्मीमाश्रयामः।

यस्याः कटाक्षवीक्षाक्षणलक्ष्यं लक्षिता महेशाःस्युः।
श्रीरङ्गराजमहिषी सा मामपि वीक्षतां लक्ष्मीः।।११।।

भावः - यस्याः लक्ष्मीदेव्याः कटाक्षवीक्षणेभ्यः लक्ष्यंभूताः महत्भगवत्कैङ्कर्यसम्पद्युताः धन्याः भवन्ति तादृशवैभवोपेत रङ्गनायकीभूतलक्ष्मीदेवी मामपि कटाक्षवीक्षणैः अनुग्रहिष्यतीति सर्वसम्पन्मूला लक्ष्मीदेवी एवेति वेदयति।

इदं श्रीस्तवं दिने दिने पठनात् सर्वसम्पच्छ्रेयश्शान्ति सौख्यनि प्रान्पुवन्तु।

(सर्वेजनास्सुखिनो भवन्तु)

तेलुगुभावमूलम् - डा.ई.शिङ्गराचार्यः
संस्कृतानुवादः - आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

मुद्दाडरविचन्द्राः 1996 वर्षीय भारतपरिपालनसेवा (ऐ.ए.यस्) (सीनियर्) महोन्नताधिकारी।सः आन्ध्रप्रदेश सेवा (क्याडरु) सम्बन्धी। एते 1972 वर्षे आगस्टु 19 तिथौ आन्ध्रप्रदेशराष्ट्रे जाताः। केवलं २४ वर्षेष्वेव 1995 यू.पि.यस् सिविल् सर्वीसेसू परीक्षायां उत्तीर्णतां साधितवन्तः। बि.टेक् (मेकानिकल् इन्जनीरिङ्ग्) पट्टभद्राः एते आन्ध्रप्रदेशराष्ट्रे बहुमुख्यपरिपालनपदवीषु कार्यनिर्वहणं कृत्वा आर्थिक सामाजिक संक्षेमारोग्यमुख्यमन्त्रिकार्यालयादिप्रधानशाखासु समर्थतया कार्याणि चक्रुः। 2025 वर्षे प्रत्येक प्रधान सेक्रटरीत्वेन मुख्यमन्त्रिणः प्रभुत्वकार्यसेवाः निर्वहन्तिस्म।

सेवानुभवः - १.सहायक कलेक्टरु - आसिफाबाद्, अदिलाबाद् (जिल्ला)। २.प्राजेक्ट डैरेक्टर्, डि.पि.ए.पि, चित्तूरु।३.जायण्ट्कलेक्टर्, आर्.आर् (रङ्गारेड्डि) हैदराबाद्।४.कलेक्टर् - नेल्लूरु क्लेक्टर् अपि च जिल्ला म्याजिस्ट्रट् चित्तूरु।५.वैस् चेर्मेन् पुनः मेनेजिंग् डैरेक्टर् A.P.H.M. and HIDC, हैदराबाद्।६.कलेक्टर् पुनः जिल्ला म्याजिस्ट्रेट् तूर्पुगोदावरीजिल्ला।७.मेम्बरु सेक्रेटरी - आन्ध्रप्रदेशकालुष्य नियन्त्रणमण्डली।८.मेनेजिंग् डैरेक्टर् A.P.H.M. and HIDC.। ९.प्रभुत्वकार्यदर्शी-आर्थिकशाखा (व्ययविभागः)।१०.प्रभुत्वकार्यदर्शी सामाजिक संक्षेमशाखा।११.प्रभुत्वकार्यदर्शी - गिरिजन संक्षेमशाखा।प्रिन्सिपल् सेक्रेटरी - टु - गवर्णमेन्टु (कोविड् -१९ नर्वहणम् - पुनः टीकाकरण) आरोग्य वैद्यकुटुम्बसंक्षेमा शाखा। १२. प्रिन्सिपल् सेक्रेटरी - टु - गवर्णमेन्टु (कोविड् -१९ निर्वहणशाखा टीकाकरण) आरोग्यं वैद्यं पुनः कुटुम्बसंक्षेम शाखा।१३.प्रिन्सिपल् सेक्रेटरी - टु गवर्णमेन्टु महिलाशिशु-विकलाङ्ग पुनः वृद्धसंक्षेमशाखा।

विविधप्रभुत्वशाखासु क्रमशः ''उरुक्रमस्यांघ्रिरूपर्युपर्यथो महर्जनाभ्यां तपसःपरं गतः'' इति वामनमूर्तिवत् विविधपदवीषु कार्यं चक्रुः। अपारानुभावं स्वाधीनीकृत्य स्वीयशैल्यां कर्मकृत्वा स्वविभागेषु सर्वैरपि कर्मकर्तुं तेषु अङ्कितभावं संवर्धयामासुः उन्नताधिकारिणां प्रसंसापात्राः अभूवन् एते कलियुगप्रत्यक्षदैवस्य श्रीवेङ्कटेश्वरस्वामिनः प्रधानसेवकत्वेन श्रीकार्यनिर्वहणाधिकारित्वेन दैवकार्यनिर्वहणाय आगमनं मुदावहः। एते सप्तगिरिमासपत्रिकायाः गौरवसम्पादकत्वेन व्यवह्रियन्ते। सप्तगिरिपत्रिका एभ्यः हार्दिकस्वागतं विदधाति।

25.01.2026 तिथौ तिरुमल वेङ्कटेश्वरस्वाम्यालये ति.ति.देवस्थान नूतन संयुक्तकार्यनिर्वहणाधिकारित्वेन विद्या-वैद्यम्) डा. ए.शरत् ऐ.ए.यस्., (Retd.,) महोदयैः पदवीबाध्यतास्वीकरणदृश्यम्। अनन्तरं कुटुम्बसभ्यैः सह श्रीवेङ्कटेश्वरस्वामिदर्शनं प्राप्य तीर्थप्रसादान् स्वीचक्रुः।

मत्स्यजयन्ती

- डा वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

मत्स्यकूर्मवराहश्चनारसिंहश्च वामनः।
रामो रामश्च कृष्णश्च बुद्धः कल्किरेवच।।

विष्णुमूर्तेः दशावतारेषु मत्स्यावतारः प्रथमः। धर्मसिन्धौ चैत्रशुक्लप्रतिपत्तिः मत्स्यजयन्तीत्येके। एतदनुसृत्य मत्स्यजयन्ती चैत्रशुद्धप्रतिपत्तौ कर्तव्येति केषाञ्चिन्मतम्। स्मृतिकौस्तुभेऽपि इयमेव तिथिः मत्स्यजयन्तीति निर्दिष्टा। अमोदरुज्योतिष्यां चैत्रशुद्धततृीया तिथिः मत्स्यजयन्तीति निर्दिष्टम्। चैत्रबहुलपञ्चम्यामेव मत्स्यजयन्ती निर्वाहनीयेति प्रामाणिकग्रन्थेषु प्रोक्तम्। मत्स्यावतारगाथा -

सोमकनामराक्षसः ब्रह्मणः निद्रावस्थायां उचितसमयं ज्ञात्वा ब्रह्ममुखस्थवेदचतुष्टयं चोरयित्वा समुद्रे निलीनः आसीत्। वेदाभावात् ब्रह्मणः सृष्टिकार्यस्य विघ्नः जातः, विषयमेनं विष्णुमूर्तेः विज्ञापयामास। तदा विष्णुः मत्स्यमूर्तिं स्वीकृत्य जले अन्विष्य सोमकासुरं हत्वा हस्तचतुष्टयेन चतुर्वेदानानीय ब्रह्मणे समर्पयामास।

वैवस्वतमनुः पितृतर्पणं करोति। तस्य हस्तयोःएषः मत्स्यः अपतत्। करुणया सः स्वकमण्डलौ निक्षिप्तवान्। सः एकदिवारात्रौ षोडशाङ्गलपर्यन्तमवर्धत। कमण्डलुः मम स्थितेः अपर्याप्तमिति कथनात् मनुः एकलघुजलाशये पातयामास। एकस्यामेव रात्रौ सः ३६ अङ्गुलपर्यन्तं आवर्धत। पुनः ममतैत् स्थलमपर्याप्तमिति कथनात् तदा मनुः तं तटाके पातायामास। तटाकोऽपि तस्य स्थितेः अपर्याप्तः। तदा सः तं समुद्रे पातयामास। सुमुद्रे सः मत्स्यः लक्षद्वययोजन प्रमाणमवर्धत। ततः अयमपि प्रदेशः मम अपर्याप्तः इति सः मत्स्यः रुरोद। तदा मनुः आश्चर्यचकितः अद्भूतलीलाप्रदर्शकः त्वं वासुदेवः स्याः इत्यवोचत्। तदा सः मत्स्यः अद्य मत्स्वरूपं ज्ञातोऽसीत्येवमुवाच। वैवस्वतमनोः नवममेनं पश्य प्रलयकालः समीप्यते। अद्यचाक्षुषमन्वन्तरः वर्षशते अन्तमेष्यति। अन्ते आनवृष्टिदोषः स्यात्। ततः पश्चात् संवर्तभीमनादद्रोण - इन्द्रवलाहकविद्युत्पताकशोणनामकसप्तमेघाः विजुम्भमानाः। अतिवृष्ट्या सप्तसमुद्राः एकीभूय जलप्रलयः सम्भविष्यति। भूमिः जलार्णवेलीना भवेत्। अतः आदौ वेदाः विद्याः बीजाः इत्यादयः अहं ब्रह्मा देवताश्च रक्षितव्याः। जलप्रलये अनन्तो नाम सर्पः जले निमज्जनोम्मज्जने भवेत्। त्वं तत्सर्पं रज्जुंकृत्वा नावमेनं तच्छृङ्गे बद्धं कुरु। प्रलये आसन्ने नौः तीव्रचलितं स्यात्। एतत्परिणामैः मा भैषीः इत्युक्त्वा मत्स्यः अदृश्यतां गतः। प्रलयकाले मनुः मत्स्योक्तप्रकारमाचर्य वेदरक्षको भूत्वा लोकानुद्दधार। अतः मत्स्यजयन्तीदिने मत्स्यप्रतिमां निर्माय पूजा कर्तव्या। मत्स्यावतारचरितमधिकृत्य पुराणमेव वेदव्यासेन विरचितम्। मत्स्यरूपविष्णुना मनोःप्रोक्तमिदं पुराणम्। ''मात्स्यं मेदः प्रकीर्त्यते। तन्मास्त्यमिति जानीध्वं'' सहस्राणि चतुर्दश सहस्रश्लोकाश्चात्र मत्सयपुराणे वर्तन्ते।

मत्स्यपुराण विषयाः -

मत्स्यावतार वर्णनम्। ब्रह्मण्डसृष्टिः, गर्भिणी धर्माः सूर्यचन्द्रवंशवर्णनम्। गयाक्षेत्रवर्णनम्। पुरुषचरितम्। कचदेवयानीवृत्तान्तः, कार्तवीर्यार्जुनचरितम्, विशोक सप्तमीव्रतम्। फलसप्तमीव्रतम् महादानवर्णनम्। पुष्पवाहनकथा, प्रयागक्षेत्रमाहात्म्यम्, यमुनानदी

स्नानमाहात्म्यम्। सप्तद्वीपवर्णनम् त्रिपुरासुरवृत्तान्तः देवासुरसंग्रामः त्रेताद्वापरकलियुगधर्माः, ऋषिलक्षणानि, तारकासुरवृत्तान्तः पार्वतीकल्याणम् विनायकविजयः कुमारसम्भवः, नृसिंहावतारवर्णनम्, विष्णुलीलाः काशीक्षेत्रमाहात्म्यम् सावित्रीसत्यवतोः कथा, राजधर्माः, सामदानभेददण्डोपायाः, सत्-दुःस्वप्नकलाः, तत्फलितानि, वामनवराहावतारवर्णमम्। एवं क्षीरसागरमथनम्, वास्तुशास्त्रसिद्धान्ताः अपि च क्रियायोगवर्णनम्। बहुविधप्रतिमालक्षणानि, इत्याद्यंशाः मत्स्यपुराणे वर्णिताः।

''लब्ध्वाजन्मयः कश्चिदूधटयेत्पौरुषं नरः। जन्मतस्य वृथा भूतम्, भूतजन्मातु विशिष्यते''। मानवैः पुरुषार्थसाधन प्रयत्नः कर्तव्यः इति मानवं चोदयति। श्राद्धकाले पितृदेवताभ्यः अन्नपानादयः समर्पणीयाः इति हैन्दवसम्प्रदायः। अस्मिन् विषये आसक्तिदायकांशः - देवो यदि पिता जातः, शुभकर्मानुसारतः। तस्यान्नममृतं भूत्वा दिव्यत्वेप्यनुमगच्छति।

कालगणनप्रस्तावना - ब्रह्मणः कालमानमनुसृत्य शतवर्षकालः शिवस्य एकं दिनं स्यात्। शिवकालमानमनुसृत्य शतवर्षाः महाविष्णोः एकनिमेषः भवेत्। महाविष्णोः जाग्रदवस्था सृष्टस्थिते भवतः। महाविष्णोः जागरणं निद्रा प्रलयस्थितिरिति पुराणानि वर्णयन्ति।

वास्तुशास्त्रोपदेशकाः - १.भृगुः २. अत्रिः ३. वशिष्ठः ४. विश्वकर्मा, ५. मयः ६. नारदः ७. नम्नजित् ८. विशालाक्षः ९. पुरन्दरः १०. ब्रह्मा ११. कुमारः, १२ नदीशः १३. शौनकः १४. गर्गः, १५. वासुदेवः १६. अनिरुद्धः १७. शुकः, १८. बृहस्पतिः इत्यष्टादश संख्याकाः वर्तन्ते।

पतिव्रता प्रभावमधिकृत्य -

''तासान्तु वाक्यं भवतीह मिथ्या नजातु लोकेषु चराचरेषु तस्मात्सदाताः परिपूजनीयाः''।

अवयवस्पन्दनम् - फलितानि -

पुरुषाणां वामभागे पार्श्वभागेहृदि मेदोभागफुरणं नशुभम्। दक्षिणभागस्फुरणं शुभप्रदम्, शिरोभागस्फरणे भूलाभः ललाटे स्थानवृद्धिः, भ्रूस्फुरणे स्त्रीप्राप्तिः शत्रुजयः, कर्णे शुभवार्ताश्रवणम्। नासिकायां सौख्यम्, अधरोष्टे स्त्रीलाभः कण्ठे सुखं भुजे सुखम् हस्ते मित्रलाभः अर्धहस्ते धनलाभः, उदरे सन्तोषः सूच्यते।

पितृदेवताभ्यः श्राद्धप्रदाने फलानि -

मत्स्य पुराणकथा - पुराकुरुक्षेत्रे कौशिको नाम विद्या वानसीत्। तस्य स्वसृपः, क्रोधनः हिंसः मिथुनः कविः वाग्दुष्टः पितृवर्ती इति सप्तपुत्राः आसन्। गर्गमहापण्डित सन्निधौ एते विद्याभ्यासं कुर्वन्ति स्म। कदाचित् क्षामे विजृम्भिते तृणखादनार्थं गुरोः कामधेनुं अटवीं नीत्वा क्षुत्पीडिताः आहारमलभमानाः कामधेनुमेव हत्वा भुक्तवन्तः। व्याघ्रः कामधेनुं चखाद इत्यसत्यं गुरोः सन्निधौ ऊचतुः। ततः ते गोहत्याकारणात् बहुनीचजन्मलेभिरे। अविस्मृतपूर्वजन्माः हरिणचक्रवाकजन्म प्राप्य मानससरोवरे परिभ्रमन्ति स्म। कदाचित् पाञ्चालदेशपालकः विभ्राजः तत्प्राप्तं जगाम। तं दृष्ट्वा सप्तमचक्रवाकपक्षी राज्ञः जन्म, पञ्चमषष्टपक्षिणौ अमात्यपदवी जन्म प्राप्तुं मनसि चिन्तयामासतुः। प्रथमचतुर्थ पक्षिणौ किमपि न कांक्षितवन्तौ।

क्लेशः फलेन हिपुर्नवतां विधत्ते।

सप्तमपक्षी स्वाभिलाषमनुसृत्य विभ्राज नामक धर्मात्मनः महाराजस्य ब्रह्मदत्तनाम्ना पुत्रजन्म स्वीचकार। राजपुत्रत्वात् समस्तविद्याः प्राप्य जन्तुभाषामपि ज्ञातुं शिक्षणमवाप। पञ्चमषष्ठपक्षिणावपि तस्यैवराज्ञः अमात्यौ जातौ। कण्डुरीकः सवालः इति तयौर्नामासीत्। प्रथमात् चत्वारः पक्षिणः ब्राह्मणगृहे जाताः। युक्त वयसि बह्मदत्तः पट्टाभिषिक्तः आसीत् अस्य पिता विभ्राजः अटवीं जगाम। एवं गच्छति काले सप्तसोदरैः खादितकामधेनुः देवलनामकस्य पुत्रिकाजन्म अवाप। ब्रह्मदत्तः तां परिणीय सुखं कालं यापयति स्म कदाचित् दम्पती द्वौ विहारार्थं उद्यानवनं जग्मतुः। तत्र एका दम्पती पितीलिका रूपे कलहायमानावास्ताम्। सकलजन्तुमाषा ज्ञानी ब्रह्मदत्तः तद्विवादमासक्त्या पश्यतिस्म। स्त्रीरूप पिपीलिकां विवादात् उपशान्तं कर्तुं पुरुषपिपीलिका एवमब्रवीत् : -

''न त्वया साहसिनीलोके कामिनी विद्यते क्वचित् - इत्युक्त्वा किमर्थं मयि कुप्यसीत्यपृच्छत्। स्त्रीपिपीलिका एवमवदत् त्वाया मोदक चूर्णं तु मां विहाय अभिलष्यता प्रमत्तेन व्यतिक्रान्तं दिनं इति। नैतदेवं करिष्यमि पुनः क्वापीह सव्रते। स्पृशामि पादौ सत्येन प्रसीद प्रणतस्यमे।'' इदं सम्भाषणं श्रुत्वा ब्रह्मदत्तः आत्मनि परिहासं चकार। पितुः विभ्राजस्य तपः प्रभावात् सकलजन्तु भाषाज्ञानं ब्रह्मदतः अवाप। अयं विष्णुप्रार्थनया सकलविद्याः अवाप।

एवं प्रवृत्तायां कथायां ब्रह्मदत्तस्य चत्वारः सोदराः अकिञ्चन ब्राह्मणगृहे वर्धिताः योगाभ्यासार्थं कुत्रचित् प्रतस्थिरे। वार्धक्ये मां परित्यज्य गच्छन्ति। मामनाथं चक्रुरितिपित्रा पृष्टेसति वयं श्लोकेमेकं वक्ष्मामः। अस्यश्लोकस्य ब्रह्मदत्तराजसमीपे पठनात् तव सर्वे क्लेशाः परिहृताः भवेयुरिति श्लोकमुपदिश्य यथेच्छंगतः। ब्रह्मदत्तः स्वभार्याः उद्दिस्य पितीलिकांसम्भाषणं श्रावयामास। अविश्वस्ता सा मां दृष्ट्वैव त्वं परिहससीत्यवोचत्। ब्रह्मदत्तः राजमन्दिरं गत्वा नियमनिष्टभ्यां सप्तरात्रव्रतनामकमन्त्र मजपत्। सप्तमरात्रौ स्वप्ने 'महाविष्णुः ब्राह्मणवेषे प्रत्यक्षीभूतः एव मवोचत् ''त्वं नगरे उदये नगरपरिप्रभ्रमणं कुरु, दृष्टे कस्मिंश्चित् वृद्धे सर्वसंशयाः परिहृताः स्युः इत्युक्त्वा अन्तर्हितः''। ब्रह्मदत्तेन तथैवाचरणात् वृद्धः कश्चित् दृष्टः। परस्परदर्शनानन्तरं सः वृद्धः श्लोकमेनं श्रावयामास

येविप्रमुख्याः कुरुजाङ्गलेषु व्याधास्तथा दाशपुरे मृगाश्च।
कालञ्जरे सप्त च चक्रवाकाः ये मानसे ते वयमत्र सिद्धाः।।

कुरुक्षेत्रे ब्राह्मणत्वेन, दाशपुरे मृगयाविनोदित्वेन कालञ्जरे हरिणत्वेन, मानससरोवरे चक्रवाकत्वेन विद्यमानेषु अस्मत्सप्तेषु अद्य वयं चत्वारः योग सिद्धाः जाताः इति श्लोकस्य भावः, एत्तच्छ्लोकस्फुरणात् ब्रह्मदत्तः, तस्य, सौदरौद्वावमात्यौ पूर्वजन्मस्फुरणात् जागृताः। ऐहिकसुखैः कालः व्यर्थः न कर्तव्य इति योगसिद्धर्थं निर्णीतवन्तः। वृद्धब्राह्मणाय बहुसम्पदग्रहारांश्च ददुः। ब्रह्मदत्तः स्वपुत्रस्य विष्वक्सेनस्य राज्यभारं समर्प्य सोदरद्वयेन सह सरोवरतीरं जगाम। तत्र सोदरचतुष्टयेन मिलित्वा योग सिद्धिमवाप। एवं महापातकगोहत्याकारिणः अपि योगसिद्धाः जाताः। एतत्कारणं भक्तिश्रद्धाभ्यां पितृश्राद्धाचरणमेव।

एवमायुर्धनं विद्यां स्वर्गं मोक्षसुखानि च।
प्रयच्छन्ति सुतान् राज्यं नृणां पीताः पितामहाः।।

य इदं पितृमाहाम्त्यं स्वर्लोके महीयते -
अस्मात्पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः।
नारायणाख्यं पदमेति नूनमनङ्गवद्दिव्यसुखनि भुंक्ते।।

मत्स्यपुराणे एकपादपठनात् वैकुण्ठसुखप्राप्तिर्भवेत्।



नीतिकथा

भगवद्दर्शनात् चोरबुद्धेः परिवर्तनात् मोक्षप्राप्तिः

- डा.यन्.गुणवती,
चरवाणी - ८९१९६२०२२६

पुरा कस्मिंश्चिन्नगरे सम्यन्नस्य गृहे एकादश्यां रात्रौ भागवतकथाकालक्षेपः प्रवर्ततेस्म। अनुकूलसमये भागवतोनाम गजचोरः तस्मिन् सम्पन्न गृहे प्रविष्टः। महता क्लेशेन अन्वेषणे कृतेऽपि ईश्वरेच्छया तस्य धनं न लब्धम्। धनलाभाभावत् चिन्तितः सः स्वमनः कथाप्रसङ्गे परिवर्तयामास। अविच्छिन्नतया कथाप्रसङ्गः प्रवर्ततेस्म। प्रातः कालः सञ्जातः। तस्मिन् समये व्रजभूमिरपि अलौकिकसौन्दर्येण प्रकशते स्म। प्राणप्रियः श्रीकृष्णः आगत्य आस्मान् कदा आनन्दयिष्यतीति धेनवः तद्वत्साश्च मन्दिरमेव पश्यन्ति स्म। तदा कृष्ण प्रियसखायः श्रीदामसुदामवसुदामादि गोपबालकाः आगताः, ते कृष्णं सम्बुद्ध्य झटिति आगच्छेति आह्वयामासुः। यशोदापि बलरामकृष्णौ उत्थाप्य दध्यन्नं सञ्जीकृत्य अनर्घरत्नैः मणिभिः विविधस्वर्णाभरणैः बालौ अलङ्कृत्य गाः पालनाय वनं प्रेषितवती। चोरः निलीय सर्वमिदं पश्यन्नेवममंस्त। अहं अल्पमूल्यवस्तुप्राप्तये बहुभ्रमं प्राप्तोऽस्मि। कृष्णधृतामूल्यस्वर्णा भरणतस्करणात् धन्यो भविष्यमि। सुलभसाध्यमिदं कर्म अटव्यां बालान् बद्ध्वा मम हस्तताडनात् सर्वाण्याभरणानि समर्पयिष्यन्ति। इतः परं चौर्यावाश्यकतैव न स्यात्। महादृष्टवानहं। एतादृशालोचनाभिः सह दिव्यसुन्दर कृष्णस्वरूपमपि चिन्तयामास। तस्य हृदये एका तेजोरेखा प्रादुर्बभूव। स्वदुःखभयं विस्मृत्य तात्कालिकतया आनन्दसगरे निमज्जनं प्राप्तः। तदनन्तरं कथाप्रसङ्गः समाप्तः। पौराणिकः स्वगृहं गच्छति स्म। चोरः तमनुसृत्य गच्छन् निर्जनप्रदेशे तं सम्बुद्ध्य! हे पण्डित! त्वदुक्तामूल्याभरणधारिणोः बलरामकृष्णयोः गृहं कुत्र? ते गोपोषणाय वने कंप्रदेशं गच्छन्ति मम कथय। नोचेत् अनेन कुठारेण शिरःछेदं करिष्यामीति तं भीतश्चकार। पण्डितः चोरोऽयमिति ज्ञात्वा धैर्येण तैः बालकैः किं तव कर्म इत्यपृच्छत्। सः चोरः तैः धृतान्याभरणानि चोरयितुमिच्छामि। तवापि चोरिताभरणेषु भागं दास्यामीत्यवोचत्। पण्डितः अयं चोरः मूर्खः इति मत्वा त्वं मद्गृहमागच्छ। पत्रे विलिख्य आभरणविशेषान् कथयिष्यामीति अवोचत्। ततः चोरे गृहमागते पुराणग्रन्थमुदूघाट्य बलरामकृष्णरूप सौन्दर्याणि आभरणान्यधिकृत्य एवं श्रावयामास। तयोः चरणयोः सुन्दरसुवर्णनूपुराणि, कर्णयोः मणिमयमकरकुण्डलानि, कण्ठे

क्षमा गुणो ह्यसक्तानां, शक्तानां भूषणं क्षमा।

सुवर्णमयरत्नहाराः, वक्षसि कौस्तुभमणिः हस्ते स्वर्णमुरली वर्तन्ते। यमुनासैकते कदम्बवृक्षाधः बलरामकृष्णौ द्रष्टुं शक्यते इत्यवोचत्। पुनश्च चोरेण पृष्टः ताभ्यां धृताभरणमूल्यं शतकोटिरूप्यकं भवेत्। प्रपञ्चस्थ सर्वाभरणमूल्यं कौस्तुभमणिसमानं न भवेत् इत्युवाच। चोरः आनन्दभरितः बलरामकृष्णयोः स्थितस्थानमपृच्छत्। पण्डितः उत्तरदिङ्मुखं गछेत्यब्रवीत्। सः चोरः बृन्दावनंगत्वा कदम्बवृक्षसमीपं बलरामकृष्णौ आगमिष्यतः इति ोकृष्णध्याने आसीत्। ततः मुरलीगानं, श्रुत्वा दिव्यमङ्गलस्वरूप बलरामकृष्णौ ददर्श। ततः कदम्बवृक्षोपरिस्थितः अयं वृक्षादवरुह्य युवयोः आभरणानि ''समर्पयतं नोचेत् अनेन वृक्षशाशाखाखण्डेन ताडयिष्यामीत्यवोचत्। आभरणानि न दास्यामः इति ताभ्यामुक्तम्। तदा युवयोः सर्वाण्यभरणानि बलात् स्वीकृत्य युवां नद्यां पतयिष्य

ामीत्य वोचत्। तदा कृष्णस्य दिव्यस्पर्शेन अज्ञातविद्युत्प्रवाहेन परवशः अभूत्। ततः तस्य मनसि परिणामः सञ्जातः। युवां मानवाः वा देवताः इत्यपृच्छत्। तौ आवां नन्दकुमारौ, अस्मदाभरणानि स्वीकुरु इत्यवोचताम्। ततः सः त्वद्दर्शनैवाहं तृप्तः। आभरणानि नेच्छमीत्यवोचत्। तदा तौ एतादृशाभरणानि बहूनि आभरणानि अस्मृद्गृहे सन्ति सन्ति। स्वकीकृत्य गच्छेति सञ्चिकायां आभरणानि निवेश्य तस्मै ददतुः। ततः चोरः पण्डितगृहं गत्वा सर्वाण्याभरणानि दर्शयामास। आश्चर्यचकितः पण्डितः परमयोगिनामप्यलभ्यं परमात्मदर्शनं अस्य चोरस्य लब्धमिति ममापि बल रामकृष्णौ दर्शयेति चोरमपृच्छत्। चोरः बृन्दावने पण्डितं वृक्षसमीपे निलीनं कृत्वा कृष्णागमनं निरीक्षमानः आसीत्। ततः मुरलीगानं कृष्णदर्शनं चोराय लब्धम्। परन्तु पण्डितस्य कृष्ण दर्शनं नाभूत्। ततः कृष्णः अस्मिन् दिनेऽपि अस्मदाभरणानि आवश्यकानि चेत् स्वीकुरु इति चोरमपृच्छत्। तदा चोरः कृष्णं प्रति दत्तान्याभरणान्येव प्रत्यर्पयिष्यामि। त्वयाभरणानि दत्तनीति कथनेऽपि पण्डितः न विश्वसिति। तव दर्शनं तस्य पण्डितस्य दत्त इति कथनात् तदङ्गीकृतः कृष्णः प्रथमतः त्व मां स्पृश, ततः पण्डितं स्पृश इत्यवोचत्। तथैवाचरणात् पण्डितस्य दिव्यदृष्ट्या बलरामकृष्णदर्शनमभूत्। तौ द्वावपि बलरामकृष्णदर्शनात् परवशौ अभूताम्। पण्डितोऽपि भगवन्तौतुष्टाव। बलरामकृष्णौ तयोः आशीः प्रयुज्य अदृश्यावभूताम्। तत स्तौपरमभागवतौत्तमौ भूत्वा बृन्दावने भागवतौ भूत्वा अन्ते वैकुण्ठ प्राप्तौ।

SAPTHAGIRI MONTHLY

FORM IV

STATEMENT ABOUT OWNERSHIP AND OTHER PARTICULARS ABOUT

See Rule 8

1. Place of Publication	:	TIRUPATI
2. Periodicity of its Publication	:	Monthly
3. Printer's Name	:	Sri R.V.Vijaya Kumar, B.A.B.Ed.
Whether citizen of India	:	Yes
Address	:	Dy. E.O., T.T.D.Press Building, K.T.Road, Tirupati-517507.
4. Publisher's Name	:	**Dr. V.G.Chokkalingam,** M.A., Ph.D. P.G.Dip in JMC
Whether citizen of India	:	Yes
Address	:	Chief Editor Office, T.T.D.Press Building, 2nd Floor, K.T.Road, Tirupati-517507.
5. Editor's Name	:	**Dr. V.G.Chokkalingam,** M.A., Ph.D. P.G.Dip in JMC
Whether citizen of India	:	Yes
Address	:	Chief Editor, (FAC) Chief Editor Office, T.T.D.Press Building, 2nd Floor, K.T.Road, Tirupati-517507.
6. Name and address of individuals who own the News paper and partners or share holders holding more than one percent of the Total Capital		Tirumala Tirupati Devasthanams

I, V.G.Chokkalingam hereby declare that the particulars given above are true to the best of my knowledge and belief.

TIRUPATI
Date : 28-2-2026

(Sd.) Dr.V.G.Chokkalingam
Signature of the Publisher

श्रीरामसुग्रीवमैत्री

संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

चित्रकथा

तेलुगु मूलम् - श्रीनिवासदीक्षिताः
चित्राणि - श्री द्वारकानाथः

रावणासुरः सीतामपहृत्य गतः। तामन्विषन्तौ रामलक्ष्मणौ ऋष्यमूकपर्वतसमीपं गतवन्तौ। पर्वते सुग्रीवः तौ ददर्श। हनुमता सुग्रीवः-



गगनतले प्रतिवसन्तौ। चन्द्र सूर्यावपि विपत्तिं लभेते।


रामलक्ष्मणौ मारुतिं यूयं के इति पृष्टवन्तौ।
हे पूज्याः! मम नाम आञ्जनेयः। अहं सुग्रीवामात्यः। सुग्रीवः वानराधिपतिः। वालिः अधर्मतया सुग्रीवं राज्यभ्रष्टं चकार। सुग्रीवः युष्मात्साहाय्यं अर्थयते।
पश्चात् रामलक्ष्मणौ सुग्रीवसकाशं नीतवान्। सुग्रीवः तयोः सादरं स्वागतमब्रवीत्।
श्रीराम! वालिः मत्पत्नीं राज्यञ्च स्वाधीनं चकार। त्वयैव एतदधर्मपरिहारः कर्तव्यः। अहं राक्षसापहृत सीतानिवेशनस्थलं ज्ञास्यामि।
सुग्रीववचनानि श्रुत्वा रामः सन्तुष्टः आसीत्।
सुग्रीव! वालिंहत्वा धर्मरक्षणं करिष्यामि।
हनुमान् द्वौ शमीवृक्षशाखाखण्डावानीय तौ मथित्वा अग्निं प्रज्वालयामास।.....रामसुग्रीवौ...
अग्निसाक्षित्वेन अस्माकं मैत्री वर्धिष्यति।
द्वौ परस्परं वाग्दानं कृतवन्तौ। हनुमान् साक्षी बभूव।
रामसुग्रीवमैत्री लोके आदर्शतया स्थास्यति।

मार्च् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७

१.मेषराशिः - आध्यात्मिकौन्नत्यम् सोदरलाभः भाग्यलाभः आत्मोन्नति, तीर्थयात्राभिलाषः सम्भविष्यन्त्यपि तदा तदा मनोव्यथा वाहननष्टं प्रयाणनष्टं धनक्षयः स्थानभ्रंशः मासपूर्वार्धे सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

२.वृषभराशिः - शुभकालः संप्राप्तः, कुटुम्बभिवृद्धिः, स्त्रीसौख्यम्, अधिकारजनद्वाराप्रशंसाः सर्वत्रलाभः चिन्तितकार्यजयः अपरिष्कृतकार्याणां परिष्कारः, सोदरलाभः, भाग्यलाभः, दैवदर्शनं सम्भविष्यन्ति। लक्ष्मीपूजा कर्तव्या।

३. मिथुनराशिः - भाग्यलाभः धनादायः परम्पराभाग्यप्राप्तिः ज्ञानसाधनेच्छा मासान्ते अधिकारजनद्वाराप्रशंसाः स्त्रीसौख्यम् व्यापारलाभः तदा तदा उद्योगकार्येषु विघ्नाः, अधिककोपः वाक्पारुष्यं बन्धुजनसमागमः सम्भविष्यन्ति। श्रीमन्नारायणस्य आराधनं करणीयम्।

४.कर्काटकराशि : - अधिकधनव्ययः, ज्वरबाधा, सर्वकार्येषु विघ्नाः, सोदरचिन्ता, धननष्टं सम्भवन्त्यपि भाग्यलाभः स्त्रीजनद्वारा प्रशंसाः, वृथाप्रयाणानि, दूरगमनसञ्चारः सम्भविष्यन्ति। नवग्रहाराधनं करणीयम्।

५. सिंहराशिः - गृहेविवादाः, आनारोग्यचिन्ता उद्योगपरिवर्तनं, वैराग्यं, शत्रुजनद्वारा कानिचन कष्टानि, मासान्ते भाग्यलाभः दैवदर्शनं, तीर्थयात्राः, स्थानभ्रंशः भविष्यन्ति। नवग्रहाराधनं करणीयम्।

६. कन्याराशिः - सर्वत्रजयः उद्योगलाभः व्यापारलाभः, कुटुम्बजनाभिवृद्धिः चिन्तनम्, निद्राभङ्गः दुःस्वप्नाः सम्भवन्त्यपि सोदरलाभः, आत्मोन्नतिः सेवकजनद्वारालाभः विद्याभिवृद्धिः सम्भवन्ति शिवाराधनं करणीयम्।

७. तुलाराशिः - मनोव्यथा, दुःस्वप्नाः, धनव्ययः, उद्वेगः, बन्धुमित्रैः सह शुभसमागमः तीर्थयात्राभिलाषः, वैराग्यम् सम्भवन्त्यपि सर्वत्रजयः, प्रशंसाः लक्ष्मीकटाक्षं विशेषसुखप्राप्तिः सम्भविष्यन्ति। विष्णो आराधनं करणीयम्।

८. वृश्चिकराशिः - अधिकधनव्ययः, वाहननष्टं, प्रयाणनष्टं, उद्वेगः सम्भवन्त्यपि उद्योगकार्येषु आनुकूल्यं अधिकारजनद्वारा प्रशंसाः, दुःस्वप्नाः विद्याव्यासङ्गेषु आनुकूल्यता आलयदर्शनं च सम्भविष्यन्ति। नवग्रहपूजा करणीया।

९. धनूराशिः - सर्वत्रजयः, चिन्तितकार्यसाधनं, मित्रलाभः, सोदरलाभः, तदा तदा उद्वेगः बन्धुमित्रसमागमः शुभकार्येषुनिमग्नता, भाग्यलाभः दूरप्रायाणचिन्ता ज्ञानसाधनौत्सुक्यम् भविष्यन्ति। शिवाराधनं कर्तव्यम्।

१०. मकरराशिः - वाक्पारुष्यं कुटुम्बजनद्वारा विवादाः, सद्व्ययः, आत्मोन्नति, शरीरश्रमः, विद्याव्यासङ्गेषु उत्सुकता सम्भवन्त्यपि शान्तचित्तता, आध्यात्मिककार्यक्रमेषु उत्साहः वाहनसौख्यम् अधिकारजनप्रशंसाः सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

११. कुम्भराशिः - शरीरक्लेशः, वाक्पारुष्यम्, दूरगमनचिन्ता, ज्वरबाधा, धनागमनक्लेशः सम्भवन्त्यपि विद्याव्यासङ्गेषु उत्सुकता, मित्रलाभः, सन्तानलाभः, शुभकार्येषु आध्यात्मिककार्येषु च निमग्नता सम्भविष्यन्ति।

१२. मीनराशिः - वृथाविवादाः धननष्टम्, भ्रातृचिन्ता, क्रोधः, दूरप्रयाणचिन्ता, दुस्स्वप्नाः सम्भवन्त्यपि वाहनसौख्यम्, शुभकार्येषु निमग्नता, आरोग्यलाभः दैवदर्शनं, बन्धुसमागमः भविष्यन्ति। शिवाराधनं करणीयम्।

गुणवते कन्यका प्रतिपादनीया।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.

तिरुपतिस्थ
श्रीकोदण्डरामस्वामिनः ब्रह्मोत्सवः

16.03.2026 तः 25.03.2026 पर्यन्तम्

दिनाङ्क	वासरः	प्रातः उत्सवः	रात्रौ उत्सवः
16-03-2026	इन्दुवासरः	---	अङ्कुरार्पणम्
17-03-2026	भौम्यवासरः	ध्वजारोहणम्	महाशेषवाहनम्
18-03-2026	सौम्यवासरः	लघुशेषवाहनम्	हंसवाहनम्
19-03-2026	बृहस्पतिवासरः	सिंहवाहनम्	मौक्तिकवाहनम्
20-03-2026	भृगुवासरः	कल्पवृक्षवाहनम्	सर्वभूपालवाहनम्
21-03-2026	मन्दवासरः	आन्दोलिकायां मोहिन्यवतारोत्सवः	गरुडवाहनम्
22-03-2026	भानुवासरः	हनुमद्वाहनम्, सायं - वसन्तोत्सवः	गजवाहनम्
23-03-2026	इन्दुवासरः	सूर्यप्रभवाहनम्	चन्द्रप्रभवाहनम्
24-03-2026	भौम्यवासरः	रथोत्सवः	अश्ववाहनम्
25-03-2026	सौम्यवासरः	चक्रस्नानम्	ध्वजावरोहणम्

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY TIRUMALA TIRUPATI DEVASTHANAMS
PRINTING ON 25-02-2026 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No. 21138/1970 Postal Regd. No. TRP/154/2024-2026"
LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.





दिनमु द्वादशि नेडु तीर्थदिवसमु नीकु
जनकुंड अन्नमाचार्युंड विच्चेयवे (पल्लवी)

अनन्तगरुडमुख्युलैन सूरिजनुलतो
घननारदादि भागवतुलतो
दनुजमर्दनुडैन दैवशिखामणितोड
वेनुकोनि यारगिंच विच्चेयव (दिन)

वैकुण्ठान यालुवारललोपलनुण्डि
लोकपुनित्यमुक्तुललोननुण्डि
श्रीकान्ततोडनुन्न श्रीवेङ्कटेशुगूडि
यीकडनारगिंच निंटिकिविच्चेयवे (दिन)

सङ्कीर्तनमुतोड सनकादुलेल्लबाड
पोङ्कपु श्रीवेङ्कटाद्रि भूमिनुण्डि
लङ्के श्रीवेङ्कटगिरि लक्ष्मीविभुडुनीवु
नङ्केल मायिंटि विन्दुलारगिञ्चवे (दिन)

ताल्लपाकसाहित्यम्-2-151,श्रीरागः

अन्नमय्यवर्धन्ती
15.03.2026

पेदतिरुमलय्यः स्वपितरि अपारभक्तिप्रपत्तीः दर्शयामास। अन्नमाचार्यायस्य क्रि.श.1503 पुण्यतिथौ, फाल्गुणबहुलद्वादश्यां आचार्याय भक्ष्यभोज्यादीनि समर्प्य श्रीलक्ष्मीसमेतश्रीवेङ्कटेश्वरेणसह, वैष्णवभक्ताग्रेसरैः षड्रसोपेत भोजनानि भोक्तुमागच्छेति पेदतिरुमलय्यः आर्द्रतया गीतं गानमेव तस्य पितृभक्तेः साक्षरचिह्नम्।